नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 27

No. of Printed Pages — 7

# P—95—Sanskrit (V)

# प्रवेशिका परीक्षा, 2014

## संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. "जश्शसो: शि:" इति सूत्रस्यार्थं लिखत । 1

2. निर्देशानुसारं रूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) युष्मद् शब्दस्य चतुर्थी विभक्ते: ।

(ब) रमा शब्दस्य षष्ठी विभक्ते: ।

3. निम्नपदयो: मूलशब्दं विभक्तिं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) मम ।

(ब) रामेण ।

4. निर्देशानुसारं धातुरूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) 'दा' धातो: लट् लकारे उत्तमपुरुषस्य रूपाणि लिखत ।

(ब) 'गम्' धातो: लोट्-लकार प्रथमपुरुषस्य रूपाणि लिखत ।

5. निम्नपदयो: लकारं पुरुषं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) अनयत् ।

(ब) नर्तिष्यति ।

6. वाच्य-परिवर्तनं कुरुत — 1 + 1 = 2

(अ) बालक: कन्दुकेन क्रीडति ।

(ब) मा कलमेन पत्रं लिख्यते ।

7. "धावतो अश्वात् पतित" इत्यत्र केन सूत्रेण पञ्चमी भवति ? 2

8. 'सर्वनाम-स्थान' संज्ञा, 'नदी' संज्ञा च अनयो: सूत्रे लिखित्वा तयो: अर्थोऽपि लिखत ।

1 + 1 = 2

9. वाम्शसोः, वामि, इदुद्भ्याम् इति सूत्रेषु **द्वयोः** सूत्रयोः अर्थोः लेख्यः । 1 + 1 = 2

10. किन्नाम अव्ययम् ? 2

11. प्रातिपदिकार्थ-लिङ्ग-परिमाणवचनमात्रे प्रथमा, साधकतमं करणम् इत्यनयोः सूत्रयोः सोदाहरणम् अर्थो लेख्यः । $1\frac{1}{2} + 1\frac{1}{2} = 3$

12. निम्नाङ्कितेषु छन्दःसु कयोश्चित् **द्वयोः** लक्षणोदाहरणानि लेख्यानि — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) प्रहर्षिणी

(ब) वसन्ततिलका

(स) शार्दूलविक्रीडितम् ।

13. अधोलिखितेषु अलङ्कारेषु **द्वयोः** अलंकारयोः लक्षणोदाहरणे लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) रूपकम्

(ब) विभावना

(स) अर्थान्तरन्यासः ।

14. समया, शनैः, स्मारं-स्मारं, साकम् इत्यादिषु केषांचन त्रयाणाम् अर्थं लिखित्वा संस्कृत वाक्येषु प्रयोगं कुरुत । 1 + 1 + 1 = 3

15. निम्नलिखित-शब्दानां पर्यायत्रयं लिखत — 1 + 1 + 1 + 1 = 4

(i) वधूः

(ii) पत्नी

(iii) पुत्रः

(iv) वैद्यः ।

16. अधोलिखितेषु प्रश्नेषु यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः 1 + 1 + 1 + 1 = 4

(i) वेदाः कति सन्ति ?

(ii) भारतस्य प्रमुखाः पर्वताः के ?

(iii) सतां लक्षणं किम् ?

(iv) भारतस्य प्रमुखाः नद्यः काः ?

(v) कः दण्डम् अर्हति ?

(vi) रामदेवस्य प्रमुखानि कार्याणि लिखत ।

17. अधोलिखितेषु प्रश्नेषु यथेच्छं **पञ्चः**प्रश्नाः समाधेयाः 1 + 1 + 1 + 1 + 1 = 5

(i) धनार्थं क एक उपायः शस्यते ?

(ii) दमनककरकटौ कौ स्तः ?

(iii) कीदृशो राजा भृत्यैर्वर्धते ?

(iv) कस्मात् कारणात् दधिकर्णो मृत्युं जगाम ?

(v) राजानमुपसृत्य कुट्टिनी किमाह ?

(vi) सञ्जीवकं दृष्ट्वा सिंहः किमकरोत् ?

(vii) अमात्यः कीदृशः स्यात् ?

18. अधोलिखितयोः कथयोः **एकस्याः** सारांशं संस्कृते लिखत — 2

(i) ‘धूर्त दमनकस्य कथा ।

(ii) सिंह-दधिकर्ण ( बिडाल ) कथा ।

19. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रामान् , सर्वेषाम् , नृणाम् , विश्वपः ।

20. निम्नलिखितेषु प्रयोगेषु **द्वौ** प्रयोगौ साधनीयौ — $2\frac{1}{2} + 2\frac{1}{2} = 5$

मतिः, रमायै, श्रियौ, सर्वस्यै ।

21. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

ज्ञानम् , वारिणी, धातृणी, सुनुनी ।

22. अधोलिखितोदाहरणेषु केषांचन **पञ्च** प्रयोगाणां ससूत्रं विभक्तिं निर्दिशत — $1 + 1 + 1 + 1 + 1 = 5$

(i) हरये नमः

(ii) बलिं याचते वसुधाम्

(iii) ग्रामाद् आयाति

(iv) मासमधीते

(v) स्थाल्यां पचति

(vi) विप्राय गां ददाति

(vii) क्रोशं कुटिला नदी ।

23. अधोलिखित गद्ययोः कस्यचिदेकस्य सप्रसंग व्याख्या कार्या — 3

पृष्टो दमनकोऽब्रवीत-देव ! पश्यामि सञ्जीवकः तवोपरि असदृशव्यवहारीवाऽऽभाति । तथा चास्मत्सं निधाने श्रीमद्देवपादानां शक्तित्रय-निन्दां कृत्वा राज्यमेवाभिलषति । एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं च तूष्णीं स्थितः ।

**अथवा**

अथ कदाचित् स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितम् । अथ कनक-सूत्रानुसरणप्रवृता राजपुरुषाः तत्र तरुकोटरे सूत्रेण सहतिष्ठन्तं कृष्णसर्पमपश्यन् , ततः कनकसूत्रमासादयितुं सर्पं जघ्नुः । अतोऽहं ब्रवीमि-पराक्रमेणापि यदशक्यं तदुपायेन साधयेत् ।

24. **कस्याप्येकस्य** श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या — 3

(i) विन्ध्य-सह्याद्रि-नीलाद्रि-मालान्वितं,

शुभ्रहैमाद्रि-हासप्रभा-पूरितम् ।

अर्बुदारावलि-श्रेणि-सम्पूजितं,

भूतले भाति मेऽनारतं भारतम् ॥

(ii) यत्र मंदाकिनी पापसंहारिणी,

यत्र गोदावरी चारु संचारिणी

देववाणी च यत्रास्ति मोदाकुला

भूतले भाति मेऽनारतं भारतम् ॥

25. अधोलिखित पद्ययो: कस्यचिदेकस्य सप्रसङ्गान्वय भावार्थो लेख्य: — 3

(i) गाव: प्रसन्ना: मनुजा: प्रसन्ना:

देवा प्रसन्ना: व्रतदानयज्ञै: ।

किं नाम तद्यन्न मरौ समृद्धम्

विद्यासमृद्धो भवता विधेय: ॥

(ii) मरुप्रदेशे व्रजमाधुरी किं,

रासोत्सवस्तत्र कथं कृपालो ।

कलिन्दकन्या पुलिनं न मंजु,

न ज्ञायते सम्प्रति कौतुकं ते ॥

26. **कमप्येकं** विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धं लिखत — 4

(i) संस्कृत-दिवसः ।

(ii) पर्यावरण-प्रदूषणम् ।

27. स्वयं चाणक्यः इति मत्वा राजकीय-प्रवेशिका-संस्कृत-विद्यालय-जयपुरस्थ-प्रधानाध्यापकाय दिनद्वयस्य रुग्णावकाशाय प्रार्थना-पत्रं लिखत । 3

**अथवा**

भवतः मित्रं मुकेशः प्रवेशिका कक्षायां प्रथमं स्थानं प्राप्तवान् । अतः स्वं नरेशं मत्वा मित्राय वर्धापनपत्रं लिखत ।